## परावराधमोत्तमपूर्वाच्च । (५/१३७५)

पर अवर अधम उतम इत्येवंपूर्वाच्चार्धात्[1] यत् प्रत्ययो भवति शैषिकः[2] । परार्ध्यम् । अवरार्ध्यम् । [3]अधमार्ध्यम् । उत्तमार्ध्यम् । पूर्वग्रहणं किम् ? [4]परावराधमोत्तमेभ्यः इत्येवोच्यते, अर्धात् इति [5]वर्तते, तस्य तत्पूर्वता [6]विज्ञास्यते ? परावरशब्दा[7]वदिग्ग्रहणावपि स्तः परं सुखम्, अवरम् [8]सुखम् इति । तत्र कृतार्थत्वाद् दिक्शब्दपक्षे परेण ठञ्यतौ स्याताम् । अस्मात् पूर्वग्रहणाद् यत् प्रत्ययो भवति परार्ध्यम्, अवरार्ध्यम् [9]इति ॥

## दिक्पूर्वपदाट् ठञ् च । (६/१३७६)

दिक्पूर्वपदाद[10]र्धान्तात् प्रातिपदिकात् ठञ् प्रत्ययो भवति, चकाराद् यत् च शैषिकः । अणोऽपवादः । पौर्वार्धिकम्, पूर्वार्ध्यम् । दाक्षिणार्धिकम्, दक्षिणार्ध्यम् । पदग्रहणं स्वरूपविधि[11]निवारणार्थम् ॥

## ग्रामजनपदैकदेशादञ्ठञौ । (७/१३७७)

दिक्पूर्वपदात् इत्येव । ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च प्रातिपदिकाद् दिक्पूर्वपदाद[12]र्धान्ताद् अञ्ठञौ प्रत्ययौ भवतः शैषिकौ । यतोऽपवादौ । इमे खल्वस्माकं ग्रामस्य जनपदस्य वा [13]पौर्वार्धाः, पौर्वार्धिकाः । दाक्षिणार्धाः, दाक्षिणार्धिकाः ॥

## मध्यान्मः । (८/१३७८)

मध्यशब्दान् मः प्रत्ययो भवति शैषिकः । [14]अणोऽपवादः । मध्यमः ।

[४४४] आदेश्चेति वक्तव्यम् ।

आदिमः ।

[४४५] अवोऽधसोर्लोपश्च ।

अवमम् । अधमम् ॥

## अ साम्प्रतिके । (९/१३७९)

अकारः प्रत्ययो भवति मध्यशब्दात् साम्प्रतिके जातादौ प्रत्ययार्थे । मस्यापवादः । साम्प्रतिकं न्याय्यं, युक्तम् उचितं, [15]सममुच्यते । नातिदीर्घं नातिह्रस्वं मध्यं काष्ठम् । नात्युत्कृष्टो नात्यवकृष्टो मध्यो वैयाकरणः । मध्या स्त्री ॥

---

1. अर्धशब्दात् फ. 2. औपसंख्यानिकस्य ठञोऽपवादः इत्यधिकम् ब. 3. नास्ति फ. 4. ननु इत्यधिकम् फ. ह. 5. अनुवर्तते ह. 6. विज्ञायते अ. क. ड. इ. ग. 7. अदिग्वचनौ ब. क. 8. दुःखम् इ. क. 9. इति नास्ति फ. 10. शब्दान्तात् फ. 11. °निरासार्थम् ब. क. ड. इ. फ. ह. 12. अर्धशब्दान्तात् ह, अर्धान्तात् प्रातिपदिकात् ब. 13. पूर्वार्धे भवाः इत्यधिकम् ड, नास्ति ब. 14. अणोऽपवादः नास्ति फ. 15. समम् नास्ति ड, समुच्यते ब.